# चतुर्थः पाठः

## बालकः

अत्र एकः बालकः अस्ति। सः पुस्तकं पठति। सः प्रतिदिनं अभ्यासं करोति। पश्चात् भोजनं करोति। त्वं अपि भोजनं कुरु। स्वच्छं जलं पिब पाठशालां च गच्छ।

बालकः पाठशालां गच्छति। सः तत्र प्रतिदिनं पठति। त्वं एकं पत्रं लिख। सः किं करोति? सः एकं पत्रं लिखति। इदानीं सः जलं पिबति। त्वं जलं पिब। सायंकाले तत्र क्रीड। सः बालकः क्रीडाङ्गणे क्रीडति।

## **caturthaḥ pāṭhaḥ = Fourth Lesson**

### **bālakaḥ = A boy**

atra ekaḥ bālakaḥ asti| saḥ pustakaṁ paṭhati| saḥ pratidinaṁ abhyāsaṁ karoti| paścāt bhojanaṁ karoti| tvam api bhojanaṁ kuru| svacchaṁ jalaṁ piba| pāṭhaśālāṁ ca gaccha|

bālakaḥ pāṭhaśālāṁ gacchati| saḥ tatra pratidinaṁ paṭhati| tvam ekaṁ patraṁ likha| saḥ kiṁ karoti? saḥ ekaṁ patraṁ likhati| idānīṁ saḥ jalaṁ pibati| tvamṁ jalaṁ piba| sāyaṅkāle tatra krīḍa| saḥ bālakaḥ krīḍāṅgaṇe krīḍati|

## मयूरः

मयूरः नृत्यति। कुत्र नृत्यति? मयूरः उद्याने नृत्यति। कदा नृत्यति? सायंकालेनृत्यति। त्वं मयूरं पश्य। मयूरः तत्र किं करोति? सः तत्र नृत्यं करोति। त्वंतत्रगच्छ। सुन्दरं मयूरं पश्य।

**mayūraḥ = A peacock**

mayūraḥ nṛtyati। kutra nṛtyati? mayūraḥ udyāne nṛtyati। kadā nṛtyati? sāyaṅkāle nṛtyati। tvaṁ mayūraṁ paśya। mayūraḥ tatra kiṁ karoti? saḥ tatra nṛtyaṁ karoti। tvaṁ tatra gaccha। sundaraṁ mayūraṁ paśya।

**अश्वः**

त्वं किं पश्यसि? अहं अश्वं पश्यामि। सः कुत्र तिष्ठति? सः उद्याने तिष्ठति। इदानीं सः किं करोति? अश्वः इदानीं धावति। त्वं अपि धाव। कः धावति? अश्वः धावति। सः कथं धावति? सः वेगेन धावति।

**aśvaḥ = A horse**

tvaṁ kiṁ paśyasi? aham aśvaṁ paśyāmi। saḥ kutra tiṣṭhati? saḥ udyāne tiṣṭhati। idānīṁ saḥ kiṁ karoti? aśvaḥ idānīṁ dhāvati। tvam api dhāva। kaḥ dhāvati? aśvaḥ dhāvati। saḥ kathaṁ dhāvati? saḥ vegena dhāvati।

(English)

**A Boy**

Here is a boy. He reads a book. He studies every day. Then he takes meals. You also take meals. Drink clean water and go to school.

A boy goes to school. He reads there every day. You write a letter. What does he do? He writes a letter. Now he drinks water. You drink water. Play there in the evening. The boy plays in the play-ground.

**A Peacock**

A peacock dances. Where does it dance? The peacock dances in the garden. When does it dances? It dances in the evening. You look

at the peacock. What does the peacock do there? It dances there. You go there . Look at the beautiful peacock.

## A Horse

What do you see? I see a horse. Where does he stand? He stands in the garden. What does the horse do now? The horse runs now. You also run. Who runs? The horse runs. How does he run? He runs fast.